# M.A.(Previous) Degree Examination August / September 2009
## Directorate of Distance Education
## SANSKRIT
## PAPER I - CLASSICAL LITERATURE - I
## Texts : (1) Kirātarjuniyam (I & II)
## (2) Mahāsvetāvṛttānta of Kādambāri
## (Freshers)

Time: 3 Hours | Max. Marks: 80

**Note : Answer either in Kannada, English or Sanskrit.**

**I. एतेषु पद्यद्वयं विवृणुत :** 12

1) निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तत तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥

2) महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरवोहितं फलैः ॥

3) परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥

**II. अनयोः गद्यभागयोरेकं सानुवादं व्याख्यात :** 12

1. किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणम् ? क्वेदं वयः । क्वेयमकृतिः । क्व चायं लावण्यातिशयः । क्वेयमिन्द्रियाणामुपशान्तिः । तद्दद्भुतमिव मे प्रतिभति । किं निमित्तं बाऽनेकसिद्धसाध्यसंबन्धानि सुरलोकसुलभानि अपहाय दिव्याश्रमपदान्येकाकिनी वनमिदममानुषमधिवससि ? कश्चायं प्रकारो यत्तैरेव पंचभिर्महाभूतैरारब्धमीदृशीं धवलतां धत्ते शरीरम् ? नेदमस्मभिरन्यत्र दृष्टश्रुतपूर्वम् । अपनयतु नः कौतुकम् । आवेदयतु भवती सर्वम् ।

2. साऽहं पितृभवते बालतया कलमधुरप्रलापिनी वीणेव गंधर्वाणामंकादकं सचरन्ती, अविदितस्नेहशोकायासमुनोहरं शैशवमतीतवती । क्रमेण च कृतं मे वपुषि वसन्त श्व मधुमासेन, मधुमास श्व तवपल्लवेन, नवपल्लवश्व कुसुमेन, कुसुमश्व मधुकरेण, मधुकर इव मदेन नवयौवनेन पदम् ।

**III.** किरातार्जुनीयस्य महाकाव्यत्वं निरूपयत । 12

**अथवा**

भारवेर्श्थगौरवमधिकृत्य सविमर्शं प्रबन्धंलिखत ।

**IV.** कादम्बरीरसाज्ञानामाहारोऽपि न रोचते समर्थमत । 12

**अथवा**

महाश्वेतायाः पात्रचित्रणं कुरूत ।

V. 'क' विभागाद् द्वयं 'ख' विभागद् द्वयं च ससन्दर्भं व्याख्यातः । 12

'क' विभाग

1) न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणं: ।

2) वरं विरोधोऽपि समं महात्मभिः ।

3) स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ।

4) अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिन : ।

'ख' विभाग

1) अणुरपि उपचारपरिग्रहः प्रणयमारोपयति ।

2) अदूरकोपा हि मुनिजनप्रवृत्ति : ।

3) अहो दुर्निवारता व्यसनोपनिपातानाम् ।

4) न ह्यल्पीयसा शोककारणेन क्षेत्रीक्रियन्ते एवंविधा मूर्तयः ।

VI. a) **संस्कृतभाषायां अनुवादं कुरूत ।** 10

ನಮ್ಮ ಪಾಠಶಾಲೆ ಬಹಳ ವರ್ಷಗಳಿಂದ ನಡೆದು ಬಂದಿದೆ. ಇದರ ವಿದ್ಯಮಾನಗಳಲ್ಲಿ ಗ್ರಾಮೀಣರು ಭಾಗವಹಿಸುತ್ತಾರೆ. ಈ ಪಾಠ ಶಾಲೆಯಲ್ಲಿ ಕಲಿತ ಅನೇಕರು ದೊಡ್ಡ ಉದ್ಯೋಗಗಳಲ್ಲಿದ್ದಾರೆ. ಹಳೆಯ ವಿದ್ಯಾರ್ಥಿಗಳೆಲ್ಲಾ ಸೇರಿ ಒಂದು ಸಂಘವನ್ನು ಮಾಡಿದ್ದಾರೆ. ಅವರು ಬಂದಾಗೆಲ್ಲ ಶಾಲೆಗೆ ಬಂದು ಹೋಗುತ್ತಾರೆ. ತಾವು ಓದಿದ ದಿನಗಳನ್ನು ಹಾಗೂ ಅಧ್ಯಾಪಕರನ್ನು ಕೃತಜ್ಞತೆಯಿಂದ ನೆನಪಿಸಿಕೊಳ್ಳುತ್ತಾರೆ.

Our school is in existence from many years. The villagers take part in the activities of the school. Many who got educated in this school are highly placed in offices. Old students have formed an association. Whenever they come to the village they visit the school. They remember those school days and teachers with gratitude.

b) **कर्णाटभाषायां आङ्ग्लभाषायां वा अनुवादं कुरूतः** 10

पुष्करेण भ्रात्रा द्यूते जितो नलः राज्यं परिव्यज्य दमयन्त्या सह वनमियाय । तत्रापि कलिना बहुविधैश्चलैः पीडितः सुप्तां पत्नीं विहाय अन्यस्मिन् स्थले जगाम । गच्छन् महान्तं दावानलं ददर्श । तन्मध्ये कर्कोटको नाम नाग आसित् । तमजरारं तन्मध्यादुद्धृत्य कानिचित्पहानि निनाय । दशमे पदे तु नाराः नलम् अदशत् । तेन नैषधस्य निजरूपमन्तरधीयत ।

**अथवा**

**द्वयोः अर्थविस्तरणं कुरूत (संस्कृतभाषायाम्)** 20

1) पृथिव्यां त्रीणिरत्नानि जलमन्नं सुभाषितम् ।

2) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

3) अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।

* * *

DPA 520

# M.A.(Previous) Degree Examination August / September 2009
## Directorate of Distance Education
## SANSKRIT
## PAPER II: CLASSICAL LITERATURE - II
## Texts : (1) Abhijnana Sākuntalam
## (2) History of Classical Sanskrit Literature
## (Freshers)

Time: 3 Hours — Max. Marks: 80

I. a) ''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला'' प्रतिपादयत । — 10

**अथवा**

अभिज्ञानशाकुन्तलस्य प्रथमाङ्कस्य सारं निरूपयत ।

b) द्वयमधिकृत्य लघुटिप्पणीं लिखत । — 08

(1) नान्दी (2) प्रियंवदा

(3) सूत्रधारः (4) शापप्रसंगः

II. a) अधोनिर्दिष्टेषु द्वयं सानुवादं च विवरणं कुरूत । — 10

1. मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्या ॥

2. यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोः
न मे दूरे किंचित्क्षणमपि न पार्श्वे रथजवात् ।

3. नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः ।
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः -
तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥

b) अधोनिर्दिष्टेषु चत्वारि ससन्दर्भं व्याख्यात । — 10

1. भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।
2. हला शुकुन्तले इयं स्वयंवरवधूः सहकारस्य त्वया कृवनामधेया वनज्योत्स्नेति नवमालिका ।
3. उत्सवप्रियाः खलु मनुष्याः ।
4. अतिस्नेहः पापशङ्की ।

III. आलङ्करिकजगति माघस्य योगदानं विशदयत । 10

**अथवा**

खण्डकाव्यानि अधिकृत्य प्रबन्धं लिखत ।

IV. ''गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते'' विशदयत । 10

**अथवा**

रूपकाणाम् उद्गमं विकासश्चाधिकृत्य प्रबन्धमारचयत ।

V. रूपकप्रपञ्चं प्रति श्रीहर्षस्य योगदानं विशदयत । 10

**अथवा**

साहित्यक्षेत्रे रामायणस्य प्रभावं निरूपयत ।

VI. त्रयमधिकृत्य टिप्पणीं लिखत । 12

(1) कालिदासः । (2) बाणः ।

(3) भासः । (4) मेघदूतम् (5) पञ्चतन्त्रम् ।

* * *

# M.A.(Previous) Degree Examination August / September 2009
## Directorate of Distance Education
## (Freshers)

## SANSKRIT
### PAPER III - Vyakarna and Indian Philosophical Systems
### (a) Siddhanta Kaumudi (from Karaka to Pradisamasa)
### (b) Nyayasutra (I & II Chapters Only)
### (c) Sarvadarsanasangraha (Carvaka, Bauddha, Ramanuja and Purnaprajna Darsanas only)

Time: 3 Hours — Max. Marks: 80

**I. चत्वारि सूत्राणि सोदाहरणं विवृणुत ।** — 12

1. कर्मणि द्वितीया ।
2. सहयुक्तेऽप्रधाने ।
3. रुच्यर्थानां प्रीयमाणः ।
4. स्पृहेरीप्सितः ।
5. नक्षत्रे च लुपि ।
6. पञ्चमी विभक्ते ।
7. विभाषा कृञि ।
8. कृत्यानाम् ।

II. करणकारकं अथवा सम्प्रदानकारकमधिकृत्य टिप्पणीं लिखत । — 08

**III. चतुर्णां पदानां सप्रमाणं विग्रह वाक्यानि लिखत ।** — 12

1. अपदिशम् ।
2. उपकृष्णम् ।
3. कृष्णश्रितः ।
4. यूपदारु ।
5. चोरभयम् ।
6. अक्षशौण्डः ।
7. षण्मातुरः ।
8. घनश्यामः ।

VI. न्यायसूत्ररीत्या प्रमाणानि अधिकृत्य प्रबन्धमेकं लिखत । 10

**अथवा**

सिद्धान्तः कः तस्य भेदान, ससूत्रं विवृणुत ।

V. a) **त्रीणि सूत्राणि विवृणुत ।** 09

1. जाति विशेषे चानियमात् ।
2. अनेकान्तिकः चानियमात् ।
3. साध्यनिर्देशः प्रतिज्ञा ।
4. सः प्रतिपक्षस्थापनाहीनो वितण्डा ।
5. तत्प्रामाण्ये वा न सर्वप्रमाण विप्रतिशेधः ।

b) **न्यायसूत्रानुसारेण त्रयाणां लघुटिप्पणीः लिखत ।** 06

1. अपवर्गः ।
2. प्रयोजनम् ।
3. कर्म ।
4. निर्णयः ।
5. शरीरम् ।

VI a) पूर्णप्रज्ञमतोक्तरीत्या विष्णोः सर्वोत्कर्षत्वं विशदयत ।

**अथवा**

रामानुजमतानुसारेण तत्वमसि श्रुतेः अर्थनिरूपणं समर्थयत । 11

b) **त्रीन् अधिकृत्य टिप्पणीः लिखत ।** 12

1. चार्वाकाणां देहात्मवादः ।
2. शून्यवादः ।
3. प्रपत्तिः ।
4. माध्वमतेन मोक्षः ।
5. सायणमाधवः ।

* * *

# M.A.(Previous) Degree Examination
# August / September 2009
# Directorate of Distance Education
# (Freshers)

## PAPER IV - SPECIAL ALANKARA - 1
## (a) Appayya Dixit's Kuvalayananda (Upamā to Vyakirekha)
## (b) Dhanyāloka - 1-2 Chapters only
## (c) Theories of Alankāra and Rīti

Time: 3 Hours

Max. Marks: 80

**सूचना : उत्तराणि संस्कृतभाषया, कन्नडभाषया आंग्लभाषया वा लिखत ।**

I. अलंकारशस्त्रे वामनस्य दण्डिनः वा स्थानमधिकृत्य प्रबन्धं लिखत । 10

II. **चत्वारि अधिकृत्य सोदाहरणं विवृणुत ।** 12

(1) पूर्णोपमा । (2) संदेहालंकारः ।

(3) परिणामालंकारः । (4) भ्रान्तिमानलङ्कारः ।

(5) दृष्टान्तः । (6) व्यतिरेकः ।

III. उपमा अथवा उत्प्रेक्षालंकारं व्याख्यात । 10

IV. **एतेषां चतुरः अलंकारान् निर्दिश्य विवृणुत ।** 12

1. गगनं गगनाकारं सागरः सागरोपमः ।
2. निर्झर इव मदधारा मदधारेवस्य निर्झरः स्रवति ।
3. अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
4. तापेन भ्राजते सूरः शूरुश्चापेन राजते ।
5. तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः ।
6. मदेनभाति कलभः प्रतापेन महीपातिः

V. काव्यस्यात्मा ध्वनिः - विशदयत । 12

**अथवा**

आनन्दवर्धनाचार्येण दत्तं ध्वनि काव्य लक्षमण् निरूपयत ।

VI. अधोनिर्दिष्टेषु चत्वारि व्याख्यात । 12

1. प्रतीयमानं पुनरन्यदेव वस्वस्ति वाणीषु महाकवीनाम्।
2. काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
3. लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः ।
4. अर्थान्तरे संक्रामितमत्यन्तं वा तिरस्कृतम् ।
5. काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ।
6. तमन्यं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ।

VII. अधोनिर्दिष्टेषु चतुर्णां काव्यसौंदर्यं विवृणुत । 12

1. भ्रमधार्मिक विश्वस्तः स शुनकोद्य मारितस्तेन ।
   गोदानदीकूललताकुञ्जवासिना दृप्तसिंहेन ॥
2. व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि ।
   मा तवापि तथा विना दाक्षिण्यहतस्य जनिषत ।
3. कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सश्रणमधरम् ।
   सभ्रमरपदाघ्रायिणि वारितवामे सहस्वेदानीम् ॥
4. चुम्ब्यते शतकृत्वोऽवरुध्यते सहस्रकृत्वः ।
   रत्वा पुनरपि रम्यते प्रिये जने नास्ति पुनरुक्तम् ॥
5. चक्राभिघातप्रसभाज्ञयैव चकार राहुवधूजनस्य ।
   आग्लिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम् ॥
6. तस्या विनापि हारेण निसर्गादेव हारिणौ ।
   जनयामासतुः कस्य विस्मयं न पयोधरौ ॥

* * *